अणुमुख (aṇu-mukha) *adj.* [*f.* -ī] **i** with a very small or minute opening (a wound or sore) छिद्रैरणुमुखैर्वस्तु चितं यस्य समन्ततः। वातशोणितजो व्याधिर्विज्ञेयः शतपोनकः SuśruS. ii. 14.12; AṣṭāHṛ. vi. 28.12; (व्रणाः) क्षीणमांसानां च सर्वतोगतयस्त्वणुमुखा मांसबुद्बुदवन्तः AṣṭāSaṁ. ii. 290.14 (6.29); RugVi. 48.9; **ii** having a very small mouth (जलायुका) गोवृषणवदधोभागे द्विधाभूताकृतिरणुमुखी गोचन्दनेति SuśruS. i. 13.11; **iii** beginning with a small measure आरंभे च व्ययमणुमुखं बाणधारावलीना(? नां) प्रावृड्व्यक्तातिशयविषमं मेघवन्मेघनादः RāmC. 30.82.

अणुमुष्टिक (aṇumuṣṭi-ka) *m.* a kind of shrub possessing medicinal properties (commonly called *Bishdori*) विषमुष्टिः…अणुमुष्टिकः RājNi. 338.11.

अणुमेहन (aṇu-mehana) *adj.* (an elephant) having a small penis (शुद्धः संजायते जात्या मृगनामा मतङ्गजः) ह्रस्वरोमाणुमेहनः Hastyāyur. 418.4 (3.8)

अणुरजःपथा (aṇu-rajaḥpathā) *adj.* [*f.* -ā] (a woman) with a very narrow path of mentrual discharge स्त्रीव्यवायनिवृत्तस्य सहसा भजतोऽथ वा। दोषाध्युषितसंकीर्णमलिनाणुरजःपथाम्।… दोषा दुष्टा गता गुह्यं त्रयोविंशतिमामयान्। जनयन्ति AṣṭāSaṁ. ii. 319.15 (6.38) (F.N. अणुः सूक्ष्मः रजोमार्गः यस्यास्तथाविधां स्त्रियम्)

अणुरन्ध्र (aṇu-randhra) *n.* small hole, narrow passage आधिभौतिकदेहोऽहमिति यस्य मतिभ्रमः। तस्यासावणुरन्ध्रेण गन्तुं शक्नोति नानघ YogVā. iii. 40.8.

अणुराजि (aṇu-rāji) *f.* a mark on sword इरकस्तरवारिः स्त्री पुलकास्त्वणुराजयः (v. l. पुलाकस्त्व°) NāmaMāli. 514; Vaij. 117.163.

अणुरूप (aṇu-rūpa) *adj.* [*f.* -ā] **i** possessing the form of an atom, having a very small size or form जीवा ज्ञानवन्तोऽणुरूपाः कर्तारो योगफलभोक्तार आ मुक्तेः PārāSū. 25.29; गौरि तेऽयं सुतः… अणुरूपः स्थूलरूपः GaṇeP. ii. 85.12; ii. 97.43; तत्राणुरूपोऽर्थः सर्वथा घटते SyādvāMañ. 16 (206); कालस्तु चिरक्षिप्रभूतादिव्यवहारहेतुरणुरूपो द्रव्यविशेषः VedāntKau. 204.2 (*on* ii. 2.33); कालोऽभूद्भवतिभविष्यतीतिव्यवहारहेतुरप्यणुरूपः NyāySu.(Ja.) 411B.3 (*on* ii. 2.10); वागादयश्चाणुरूपा नित्याः AṇuBh. 162.11 (*on* ii. 4.14); कैतस्य राज्ञः सुमहच्चरित्रं कैषा पुनर्मे धिषणाणुरूपा HammīMaKā. 1.11; (नासीत्) व्योमकारणमणुरूपम् S'aṅkaVi.(Ā.) 30.8; अणुरूपे तस्मिन् किंचिदवच्छेदेन तिरोधानं किंचिदवच्छेदेन प्रकाश इति कल्पयितुमशक्यत्वात् S'ivārkaMaDī. ii. 481.27; (*on* iv. 4.1); को हि सिंहार्भकं सत्रेऽणुरूपमपि लङ्घयेत् PrabhāC. 30.3; *m.* **1** name of S'iva (देवं महेश्वरं तुष्टाव) नमः स्थूलाय सूक्ष्माय अणुरूपाय वै नमः SkandP. iii(2). 4.45; **2** name of Viṣṇu (विष्णोर्नामसहस्रं शृणु) अणुरूपो बृहद्रूपः SkandP. v(1). 63.149.

अणुरूपतस् (aṇurūpa-tas) *adv.* in a very minute or subtle form धरित्री सर्वबीजानाम्…। यत्तेऽङ्कुराणि…। कालकर्मेच्छया विष्णोः स्वाश्रितान्यणुरूपतः BṛBrahmaS. i. 13.91.

अणुरूपता (aṇurūpa-tā) *f.* the state of being of very minute or atomic form नावयव्यात्मता तेषाम् (महाभूतानाम्) नापि युक्ताणुरूपता TattvSaṁ. 1889; जीवानामणुरूपतया स्वाभाविकांशाभावेन काल्पनिकांशस्यैव वक्तव्यत्वात् AdvaiSi. 745.14.

अणुरूपत्व (aṇurūpa-tva) *n.* the state of being of the form of an atom अर्थसारूप्यं च यत् व्यवस्थाकारणमुक्तम्। तदसिद्धम्। अणुरूपत्वाचार्थस्य PrakaPañ. 143.9.

अणुरूपिन् (aṇu-rūpin) *adj.* [*f.* -iṇī] of very subtle or minute size अमा नाम कलेन्द्रोर्या वसत्यर्केऽणुरूपिणी BṛDharmaP. i. 20.50; तेषां निखातैर्बहुगुणैः सतां प्रपूर्णानि मनांस्यहो तथा। यथो(? था)त्र केषामपि तेषु तेऽधुनावकाशमायान्त्यणुरूपिणोऽपि न Gurvā. 342.

अणुरेणु (aṇu-reṇu) *m. f.* minute dust (as seen in sun-beams) [MW]

अणुरेणुजाल (aṇureṇu-jāla) *n.* aggregate of atomic dust [MW]

अणुरेवती (aṇu-revatī) *f.* a medicinal plant *Croton polyandrum* (yielding pungent oil) दन्ती… उदुम्बरदला चैव तरुणी चाणुरेवती RājNi. 53.19; चित्रा दन्ती निकुम्भः स्यादुपचित्रामकूलकः (v. l. °त्राणुरेवती) ParyāMu. 15.9.

अणुलक्षण (aṇu-lakṣaṇa) *adj.* [*f.* -ā] of the nature of an atom न घटादितया सिद्धः सोऽर्थितापरिपूर्वकः। न चेश्वरोऽनीश्वरो वा प्रकृतोऽत्राणुलक्षणः ĪśvaSi.(U.) 2.35; (पृथिवी) नित्या स्यादणुलक्षणा BhāṣāPa. 36.

अणुवंशक (aṇuvaṁśa-ka) *adj.* **1** of a family of low birth (शत्रुभिः) संक्षिप्तैरणुवंशकैर्मृगसमं प्रायः समाचर्यते YaśasCam. i. 494.2 (comm. जातिकुलहीनैः); **2** having a thin back-bone, YaśasCam. i. 494.2 (comm. अविस्तीर्णपृष्ठ(ष्ठ?)प्रदेशैः)

अणुवचन (aṇu-vacana) *n.* statement that (something) is atomic स्थूलार्थासंभवे तु स्यान्नैव वृक्षादिदर्शनम्। अतीन्द्रियतयाणूनां न चाणुवचनं भवेत् TattvSaṁ. 562.

अणुवत् (aṇu-vat) *adv.* like an atom गतियोगेऽप्याद्यकारणताहानिरणुवत् SāṁkhyaPraSū. 6.37; 1.74; 6.35; यदनित्यं तु तन्मूर्तमणुवद् बुद्धिवत्खवत् S'lokaVār. 5(4).128 (386.9); न च तदणुवत्संमतं तद्वदेतत् SaṁkṣeS'ā. 2.71 (ii. 44.5); मूर्ध्न्यर्पितमणुवत्सहस्रमूर्ध्नो भूगोलं सगिरिसरित्समुद्रसत्त्वम् DeviBhāP. viii. 21.5.

अणुवर्ग (aṇu-varga) *m.* group of individual souls जय जय जनिमार्गलग्नाणुवर्गापवर्गप्रदे NīlaVi. 56.8.

अणुवर्ण (aṇu-varṇa) *m.* letter or sound of a basic mantra (in Tantra) नादः शिवे क्षादिकपश्चिमानि शेषेषु बीजान्यथवाणुवर्णैः TantrSa. 5.51 (comm. अणुवर्णैः पञ्चाक्षराक्षरैः, स्वमूलाक्षरैः)

अणुवाचक (aṇu-vācaka) *adj.* (a letter) expressive of the individual soul यावन्तः कीर्तिता भेदैः शंभुशक्त्यणुवाचकाः MālinīT. 8.47.

अणुवातेरित (aṇuvāterita) *adj.* shaken by a gentle breeze अंशुधारय इवाणुवातेरितः MaiU. 6.35.

अणुवाद (aṇu-vāda) *m.* theory of atoms, (that the world is produced from the *paramāṇus* through the process of forming *dvyaṇuka* etc.) 'अणोरणीयान्' इत्यणुवादस्य…लिङ्गमापाततो भाति PrakaVi. 381.23; अत्र न किंचनेति शून्यस्वभाववादावणिम्न इत्यदृश्यमानाणुनिर्देशादणुवादश्च भान्ति दार्ष्टान्तिका इति VedāntKa. 228.11 (*on* i. 4.28)

अणुवादनिराकरण (aṇuvāda-nirākaraṇa) *n.* refutation of the theory of atomism समवायभ्युपगमाच्च - तदभाव इति - प्रकृतेनाणुवादनिराकरणेन संबध्यते BrahmSūBh.(S'aṅ.) 371.1 (*on* ii. 2.13)

अणुवादिन् (aṇuvād-in) *adj.* (one) who believes in the theory of atoms (as the material cause of the world) तथा अणुवादिनोऽप्यणुरण्वन्तरेण संयुज्यमानो निरवयवत्वाद्यदि कार्त्स्न्येन संयुज्येत BrahmSūBh.(S'aṅ.) 338.1 (*on* ii. 1.29); 364.2 (*on* ii. 2.10); सर्वगतत्वश्रुतिविरोधमाशङ्क्याणुवादी परमात्मविषयताभिधानेन परिहरति PrakaVi. 619.21; उर्वीनगाद्याः। सूक्ष्मैरारब्धा इति यदणुवाद्युक्तमेतद्दुरुक्तम् NayaMañ. II. ii. 3.5.

अणुवाम (aṇu-vāma) *m.* name of one of the three types of the S'āktas or S'akti worshippers (also called आणव) शाक्ताश्च त्रिविधाः। महावामा मध्यवामा अणुवामाश्चेति। एत एव क्वचिच्छाक्तशांभवाणवशब्दैरुच्यन्ते NyāySu.(Ja.) 423A.4 (*on* ii. 2.12)

अणुविनिःसृत (aṇu-vinissṛta) *adj.* discharged or released from an atom उदकं शोषयामास यत्तेजोऽणुविनिःसृतम् VāmaP. 43.33.

अणुवीक्षण (aṇu-vīkṣaṇa) *n.* **1** minute observation, observation of very minute parts [APTE]; **2** an instrument like the microscope enabling one to discern the smallest objects [APTE]

अणुवीर्य (aṇu-vīrya) *m.* (an ironical) name of Ativīrya (*lit.* of negligible valour) पश्य स्त्रो(? श्रो) निहतं पापमणुवीर्यं मया रणे PadmP.(Ra.) 37.69.

अणुवेददारिन् (aṇuveda-dārin) *adj.* having a crack like a thin grass-blade called Veda असंधिभग्नं पुनर्द्वादशविधम्। अणुवेददारि वेदनावच्च दारितम् AṣṭāSaṁ. ii. 301.15 (6.32)

अणुवेदन (aṇu-vedana) *adj.* causing little or slight pain गुल्मः… अनियतविपुलाणुवेदनश्च भवति चलत्वाद्वायोः CaraS. ii. 3.7 (1922 Ed.)

अणुव्यतिरिक्त (aṇu-vyatirikta) *adj.* different from the atom पुद्गलो रूपरसगंधस्पर्शवद्द्रव्यम्।… परमाणुरूपं संघातरूपं च। कालः…। आकाशः…। एतेभ्यणुव्यतिरिक्तान्यस्तिकायशब्दानि NyāySu.(Ja.) 411B.4 (*on* ii. 2.10); पक्षाव्यापकविपर्ययः, यथा-क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्राणुव्यतिरिक्तत्वम् TattvCin ii(1). 399.2; ii(1). 399.3.

अणुव्यतिरेक (aṇu-vyatireka) *m.* elimination of the atom अणुव्यतिरेकेणाणुसङ्घातवादः VedāntKa. 101.10 (*on* i. 1.5)

अणुव्यपदेश (aṇu-vyapadeśa) *m.* designation as *aṇu* तथा च बुद्ध्याद्युपाधिकृतमस्य जीवत्वमिति बुद्धेरन्तःकरणस्याणुतया सोऽप्यणुव्यपदेशभाग्भवति नभ इव करकोपहितं करकपरिमाणम् Bhām. 490.12 (*on* ii. 3.29); ब्रह्मणश्च सूक्ष्मत्वाभिप्रायेणाणुव्यपदेशात् SiddhāBi. 84.2.

अणुव्यवहार (aṇu-vyavahāra) *m.* use of the word *aṇu* (atom), calling (something) *aṇu* अनित्यमणुपरिमाणं द्व्यणुक एवेत्युक्तम् कुवलयामलकबिल्वादिषु परस्परापेक्षयाणुव्यवहारदर्शनात् NyāyKa. 134.2; अणुव्यवहारस्तु तेषु भाक्तः Upask. 298.9 (*on* vii. 1.11); अणुव्यवहारश्च अपकृष्टपरिमाणनिबन्धनो महत्यपि महत्तमादणुव्यवहारात् PadārthaTaNi. 15.1-3 (Ll)